# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्री-२ ( Sem_4 ) | प्रश्नपत्र-५ | गुणाः - ७० |
| विषयः - पुराणेतिहासः | CC 2.4.7 | समयः - ०३:०० तः ०६:०० |
| दिनाङ्कः - २२-०४-२०१६ | सन्दर्भग्रन्थः - श्रीमद्भागवतमहापुराणे षष्ठ-सप्तमस्कन्धौ: | |

---

### युनिट-१

**प्रश्नः -१ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं विलिख्य संस्कृते भावार्थो लेख्यः ।** ०८

*(१) पतितः स्खलितो भग्नः सन्दष्टस्तप्त आहतः ।*
*हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ॥*

*(२) जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्तरति तच्चरणारविन्दम् ।*
*कृष्णाय नो नमति यच्छिर एकदाऽपि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥*

*(३) जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ।*
*स्थलेषु मामाबटुवामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥*

**प्रश्नः -२ अजामिलोपाख्यानं विष्णुयमदूतानां संवादेन सह वर्णयत ।** ०८

**अथवा**

**नारायणकवयोपदेशं लिखत ।**

**प्रश्नः -३ द्वयोः टिप्पणी कार्या ।** ०४

*(१) भागवतधर्मः ।* *(२) नामसङ्कीर्तनस्य महिमा ।*
*(३) दक्षपुत्रेभ्यः देवर्षेः समुपदेशः ।* *(४) दक्षपुत्रीणां वंशवर्णनम् ।*

**प्रश्नः -४ अधोलिखितेषु पञ्चानामुत्तराणि लिखत ।** ०५

*(१) षष्ठस्कन्धस्य नाम किम् ?*
*(२) षष्ठे स्कन्धे कति अध्यायाः ?*
*(३) देवगुरोः बृहस्पतेः स्थाने इन्द्रः कम् उपावेशयति ?*
*(४) दक्षप्रजापत्तेः कति पुत्र्यः ?*
*(५) दक्षः नारदाय किं शापदानं करोति ?*
*(६) वृत्रासुरः कस्य ऋषेः अस्थिभ्यः मरणमेति ?*
*(७) भागवत-शब्दस्य कोऽर्थः ?*

### युनिट-२

**प्रश्नः -५ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं विलिख्य संस्कृते भावार्थो लेख्यः ।** ०८

*(१) ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ।*
*त्वन्माययाऽऽत्मात्मजदारगेहेष्वासक्तचितस्य न नाथ भूयात् ॥*

*(२) स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवम् ।*
*विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व मार्ज्म्यहम् ॥*

*(३) यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ।*

*आत्मनमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥*

**प्रश्नः -६** **'इन्द्रे ब्रह्महत्यायाः दोषः तस्मात् निवृत्तिः' सप्रसङ्गं वर्णयत ।** **०८**

**अथवा**

**पुंसवनव्रतं वर्णयत ।**

**प्रश्नः -७** **एकां टिप्पर्णी लिखत ।** **०२**

*(१) मरुद्गणानामुत्पत्तिः ।* *(२) वृत्रासुरस्य वीरवाणी ।*

**प्रश्नः -८** **द्वयोः लघूत्तरे लिखत ।** **०२**

*(१) मरुद्गणानां सङ्ख्या का ?*

*(२) पुंसवनव्रतं कः कस्यै कथयति ?*

*(३) भृत्रासुरस्य पूर्वजन्म किम् ?*

*(४) वृत्रासुरस्य वधं कः करोति ?*

**युनिट-३**

**प्रश्नः -९** **अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं दत्त्वा संस्कृते भावार्थो लेख्यः ।** **०८**

*(१) मतिर्न कृष्णे परतः स्वतो वा भियोऽभिपद्येत गृहव्रतानाम् ।*

*अदान्तगोभिर्विशतां तमिस्त्रं पुनः पुनश्चर्वितचर्वणानाम् ॥*

*(२) स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञआप्नुयात् ।*

*क्षेत्रेषु देहेषु तथाऽऽत्मयोगैरध्यात्मविद् ब्रह्मगतिं लभेत ॥*

*(३) यतो यतो निःसरति मनः कामहतं भ्रमत् ।*

*ततस्तत उपाहृत्य हृदि रुन्ध्याच्छनैर्बुधः ॥*

**प्रश्नः -१०** **हिरण्यकशिपुना कृतान् प्रहल्लादे अत्याचारान् प्रह्लादस्य गुणान् च वर्णयत ।** **०८**

**अथवा**

**असुरबालकेभ्यः प्रदत्तं प्रह्लादेनोपदेशं लिखत ।**

**प्रश्नः -११** **टिप्पणीद्वयं लिखत ।** **०४**

*(१) प्रह्लादेन कृता नृसिंहस्तुतिः ।* *(२) ब्रह्मचर्याश्रमधर्माः ।*

*(३) मानवधर्माः ।* *(४) वर्णधर्माः ।*

**प्रश्नः -१२** **पञ्चानां लघूत्तराणि लिखत ।** **०५**

*(१) धर्मपञ्चाध्याय्यां केषामध्यायानां समावेशः भवति ?*

*(२) प्रह्लादस्य मातुः नाम किम् ?*

*(३) सप्तमस्कन्धस्य नाम किम् ?*

*(४) सप्तमे स्कन्धे कति अध्यायाः ?*

*(५) प्रह्लादस्य गुरोः नाम किम् ?*

*(६)प्रह्लादः कति श्लोकैः नृसिंहस्य स्तुतिं करोति ?*

*(७) प्रह्लादस्य कति भ्रातरः आसन् ?*

---------------------